ऽन्तरारामस्तथान्तर्ज्योतिरेव यः। स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति" गीता। "हिमक्लिष्टप्रकाशानि ज्योतींषीव मुखानि वः" "स हि देवः परं ज्योतिस्तमःपारे प्रतिष्ठितम्" कुमा०। ज्योतिःसारः ज्योतिस्तत्त्वम् ज्योतिःसिद्धान्तः।

**ज्योतीरथ** पु ज्योतिषां सूर्य्यादीनां रथ इवाधारत्वात्। ध्रुवनक्षत्रे त्रिका०। तदाधारतयैव ज्योतिश्चक्रस्य समवस्थानात् तस्य तद्रथत्वम्।

**ज्योत्स्ना** स्त्री ज्योतिरस्त्यस्याम् न उपधालोपश्च। १कौमुद्याम् चन्द्रकिरणे अमरः २रेणुकानामगन्धद्रव्ये रत्नमा०। ३दुर्गायां "प्रभा प्रसादशीलत्वात् ज्योत्स्ना चन्द्रार्कमालिनी" देवी० पु० ४५ अ०। "रौद्रायै नमो नित्यायै गौर्य्यै धात्र्यै नमो नमः। ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः" देवीमा०। ततः मत्वर्थे अण् ज्यौत्स्न तद्युक्ते त्रि० स्त्रियां ङीप् ज्यौत्स्नी।

**ज्योत्स्नाकाली** स्त्री सोमस्य कन्यायां वरुणात्मजपुष्करपत्न्याम् "एषोऽस्य पुत्रोऽभिमतः पुष्करः पुष्करेक्षणः। रूपवान् दर्शनीयश्च सोमपुत्र्या वृतः पतिः। ज्योत्स्नाकालीति यामाहुर्द्वितीयां रूपतः श्रियम्" भा० उ० ९७ अ०

**ज्योत्स्नादि** पु० मत्वर्थे अण्प्रत्ययप्रकृतिभूते पा० ग० सू० पठिते शब्दगणे स च गणः "ज्योत्स्ना तमिस्रा कुण्डल कुतप विसर्प विपादिका"।

**ज्योत्स्नाप्रिय** पुंस्त्री ज्योत्स्ना प्रियास्य। चकोरे स्त्रियां जातित्वेऽपि योपधत्वात् टाप्।

**ज्योत्स्नावृक्ष** पु० ज्योत्स्नाया दीपप्रकाशस्याधारः वृक्षः। दीपाधारे (पिलसुच) त्रिका०।

**ज्योत्स्नी** स्त्री ज्योत्स्नाऽस्त्यस्य अण् संज्ञापूर्वकत्वेऽरनित्यत्वात् न वृद्धिः ङीप्। १ज्योत्स्नायुक्तरात्रौ (झिङ्गा) २पटोलिकायाञ्च अमरः।३रेणुकानामगन्धद्रव्ये शब्दच०। स्वार्थे क। ज्योत्स्निका तत्रार्थे।

**ज्यौतिषिक** त्रि० ज्योतिषमधीते वेद वा उक्थादि० ठक्। १ज्योतिषशास्त्राभिज्ञे २तदध्येतरि च अमरः।

**ज्यौत्स्न** त्रि० ज्योत्स्ना अस्त्यस्य अण्। १ज्योत्स्नायुक्ते स्त्रियां ङीप् सा च २चन्द्रिकायुक्तरात्रौ रायमुकुटः।

**ज्रि** अभिभवे भ्वा० पर० सक० अनिट्। ज्रयति अज्रैषीत्। जिज्राय जिज्रियतु "आ भानुना पार्थिवानि ज्रयांसि महस्तोदस्य धृषता ततन्थ" ऋ० ६।६।६। "जिगादुपज्रयति गोरपीच्यं पदं यदस्य मतुथा अजीजनन्" ६।७१।५।

**ज्री** वयोहानौ वा चुरा० उभ० पक्षे क्र्या० प्वा० प० अक० अनिट्। ज्राययति ते ज्रिणाति अजिज्रयत् त अज्रैषीत्।

**ज्वर** रोगे भ्वा० पर० अक० सेट्। ज्वरति अज्वारीत्। मित्। ज्वरयति ते।

**ज्वर** पु० ज्वर+भावे घ। स्वनामख्याते रोगभेदे। ज्वरस्योद्भव निदानादि भावप्र० उक्तं यथा।

"दक्षापमानसंक्रुद्धरुद्रनिःश्वाससम्भवः। ज्वरोऽष्टधा पृथग्द्वन्द्वसङ्घातागन्तुजः स्मृतः। अस्यायमर्थः। दक्षकर्त्तृको योऽपमानस्तेन संक्रुद्धो यो रुद्रस्तस्य यो निःश्वासस्तस्मात्सम्भव उत्पत्तिर्यस्य स ज्वरः। क्रुद्धरुद्रनिःश्वाससम्भूतत्वेन ज्वरः स्वभावात्पैत्तिक इति बोध्यते। यत उक्तं चरकेण, क्रोधात्पित्तमित्यादि तेन सर्व्वज्वरेषु पित्तोपशमकारिणी चिकित्सा कर्त्तव्या अतएव वाग्भटः "उष्मा पित्तादृते नास्ति ज्वरो नास्त्युष्मणा विना। तस्मात्पित्तविरुद्धानि त्यजेत्पित्ताधिकेऽधिकम्" रुद्रसम्भूतत्वेन ज्वरस्य देवतात्मकत्वात् पूजार्हत्वं चोपदर्शितम् अतएव वैदेहः "ज्वरः संपूजनैर्वापि सहसैवोपशाम्यतीति"। मूर्त्तिरप्यस्योक्ता सुश्रुतेन "रुद्रकोपाग्निसम्भूतः सर्व्वभूतप्रतापनः। त्रिपाद्भस्मप्रहरणस्त्रिशिराः सुमहोदरः। वैयाघ्रचर्म्मवसनः कपिलो माल्यविग्रहः। पिङ्गेक्षणो ह्रस्वजङ्घो बीभत्सो बलवान्महान्। पुरुषो लोकनाशार्थमसौ ज्वर इति स्थितः। तैस्तैर्नामभिरन्येषां सत्वानां परिकीर्त्त्यते। जन्मादौ निधने चैव प्रायोविशति देहिनम्। ऋते देवमनुष्याभ्यां नान्यो विषहते हि तम्" तस्य ज्वरस्य संख्यारूपं संप्राप्तिमाह ज्वरोऽष्टधेति। अष्टत्वं विवृणोति पृथगिति वातिकः पैत्तिकः श्लैष्मिकश्चेति त्रयः। द्वन्द्वजाश्च त्रयः वातपैत्तिकः वातश्लैष्मिकः पित्तश्लैष्मिकश्चेति। सङ्घातजः सन्निपातिक एकः। "द्व्युल्बणैकोल्बणैः षट् स्युर्हीनमध्याधिकैश्च षट्। समश्चैको विकारास्ते सन्निपातास्त्रयोदश" इति चरके त्रयोदश सन्निपाता उक्तास्ते यथा। वातोल्बणः पित्तोल्बणः। कफोल्बणः। वातपित्तोल्बणः। वातश्लेष्मोल्बणः पित्तश्लेष्मोल्बणः। एवं षट्। अधिकवातो मध्यपित्तो हीनकफः। अधिकवातो मध्यकफो हीनपित्तः। अधिककफो मध्यपित्तो हीनवातश्चेति षट्। त्र्युल्बण एकः एवं त्रयोदश। अत्र तु त्रिदोषजत्वेन साम्यात्सान्निपातिक एक एव गणितः। आगन्तुज इति। अत्रागन्तुशब्देनाभिघातादयो हेतव उच्यन्ते।